केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २१६

ब्रह्माद्वैतप्रकाशिका

श्रीभाववागीशविरचिता

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम्

१९६५/११४०

मूल्यं सार्धमेकं रूप्यकम् ।

INTRODUCTION

Several valuable philosophical works have been included among the works published in the Trivandrum Sanskrit Series. Brahmādvaitaprakāśikā[1] which we are now publishing as no: 216 in the series is a useful addition to the history of Vedānta philosophy.

1. *Author and date* :— The work was written by one Bhāvavāgīśvara as we understand from the colophon[2]. Bhāvavāgīśvara's name is not seen connected with any other work, so far as our knowledge goes. The press-copy for the present edition was prepared based on a single manuscript belonging to this library (No. 950 C).

The date of the work is also not known. But we are sure that it is a later work, since the author is aware of all the three different schools of Vedānta namely Advaita, Viśiṣṭādvaita and Dvaita of which the third belongs to the XIIth Century A. D.[3]

---

1. *First serialised in the Sanskrit Journal of the Kerala University Mss. Library Vol. XIII No 2 and3.*

2. *Colophon* – इति श्रीभाववागीश्वरविरचिता ब्रह्माद्वैतप्रकाशिका समाप्ता ।

3. *Madhva, the founder of the Dvaita doctrine lived in the 12th century A. D. - See. Dr. S. Das Gupta - History of Indian Philosophy Vol. IV pp. 51-52.*

2. The contents of the work :— The present work in metrical form is a discourse on Advaita philosophy[4]. It contains two hundred and eighteen (218) verses in different metres. Bhāvavāgīśvara, the author discusses in this work the essence of Advaita Philosophy ie. that Brahman is the ultimate goal of human life. This goal, according to him, can be reached through Yoga performances. He says that it is to express this idea that he has written the present work[5].

In the benedictory stanza of the work, the author describes Brahman, the One, Omnipresent and the Real. Brahman can be realized by wise men who do not think of duality. The thought of duality is the cause of all misery in the world. This is due to 'Avidyā' or 'Māyā'. Māyā or illusion is indescribable and it can not be surmounted. Says Bhāvavāgīśvara

अनिर्वाच्यैव सा माया दुस्तरैव न संशयः ।
सोहं सोहमिति ज्ञानं यद्बलात् कोहमित्यभूत् ॥ verse 16.

Avidyā, which causes the thought that the individual soul and the supreme soul are different, does

---

4. *Cf* – इति मुषितविशेषं सर्वमद्वैतशास्त्र,
कतिपयपदवाक्यैर्ब्रह्मसिद्धान्तसारम् । ब्रह्माद्वैतप्रकाशिका-
Sloka - 217.

5. *See* – वेदान्तसारमुद्धृत्य योगानुष्ठानसिद्धये ।
इयं संक्षेपतः प्रोक्ता ब्रह्माद्वैतप्रकाशिका ॥
Stanza - 218

not touch wise men who realize the oneness of Brahman and the world. Here it may be pointed out that the author's main attack is against the Dvaita doctrine and it can be seen in several places[6].

Brahman though It is one seems to be diverse due to the plurality of the 'upādhis' (conditions). Having known the teachings of the Upanishads and having given up attachment etc. one can attain Brahman merging the individual soul in the supreme soul–

निपीयोपनिषद्विद्यां वीतरागादिविभ्रमः ।
युञ्जन्नेवात्मनात्मानं परं ब्रह्माधिगच्छति ॥ Stanza 56.

The attainment of the supreme spirit is not through 'karma' or rites, not through 'jñāna' or knowledge alone and not even through both karma and jñāna (jñāna–karma – samuccaya) but through 'prajñāna' or the ultimate wisdom[7].

---

6. *See the following lines in the work* -

उपाधिर्भेदविज्ञानं ब्रह्मणि द्वैतदर्शनम् ।	*śloka*	*8.*
द्वैतं सामान्यतोऽज्ञानं तद्यागादिप्रसिद्धये ।	,,	३२
योगिनो यदि पश्यन्ति द्वैतं प्रत्यक्षतः स्फुटम् ।	,,	३९
त्वमहंशब्दवाच्यत्वाद् द्वैतं चेल्लोकसम्मतम् ।	,,	४०
द्वैतं तु पश्यतो नित्यं संयतस्यापि सन्मुनेः ।	,,	६३
शशश्रृङ्गसमं द्वैतं कोऽनुमन्येत पण्डितः ।	,,	६५
अविद्याविद्ययोर्द्वैतं तत्सम्बन्धानुयोजनम् ।	,,	९५

7. तस्मान्न कर्मतो नान्यविज्ञानान्न समुच्चयात् ।
मुक्तिः सम्प्राप्यते किन्तु प्रज्ञानादेव केवलात् ॥ *verse 126.*

A severe preparatory training is a necessary qualification for self-realization (ātmajñāna) which finally leads to liberation. This training consists in what is technically called sādhanacatuṣṭaya[8]. Bhāvavāgīsvara takes up this subject also and gives in this connection a brief account of the preparatory training for the Vedāntic life namely 'śravaṇa' (hearing of the Vedavākyas), 'manana (thinking of their meaning) and 'nididhyāsana, (meditation).

[9]श्रवणं वेदवाक्यानां तदर्थस्य विचारणम् ।
प्रमाणैर्मननं ध्यानं निदिध्यासनमेव च ॥ २८ ॥

सद्गुरोरुपदेशेन भूयो भूयो विलोकनम् ।
दर्शनं हृदये तस्य साक्षात्कारस्य साधनम् ॥ २९ ॥

The author is of opinion that the performance of yoga. (yogābhyāsa) is also an accessary training for the attainment of salvation[10]. He mentions the different definitions of the term[11] yoga and deals with, in general, the methods of yoga practices. Yoga consists of eight

---

8. *Sādhanacatuṣṭaya* - नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोग विरागः, शमदमादिसाधनसम्पत्तिः *and* मुमुक्षुत्वम् । *See Śānkara bhāṣy Bṛhadaunder the Sūtra* ' अथातो ब्रह्मजिज्ञासा ' *I. 1. 1.*

9. *Cf.* ' आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः *raṇyakopanishad - 2-4-5*

10. *Cf.* योगाभ्यासं च कुर्वीत श्रद्धया विजितेन्द्रियः । *verse I30.*

11. *See verses from 131 to 133.*

parts namely yama, niyama, āsana, prāṇāyāma, pratyāhāra dhāraṇā, dhyāna and samādhi. The author explains all these Yoga practices[12] and concludes that by means of śravaṇa, manana and nididhyāsana along with the performance of yoga, one can attain self-realization (ātmajñāna) which finally leads to liberation (mukti).

तदेवं सह योगेन साधनैः श्रवणादिभिः ।
साध्यते तत्त्वविज्ञानं यदात्मज्ञानमुत्तमम् ॥ ६४ ॥

ततस्तेनात्मबोधेन परिपक्केन योगिनः ।
आत्यान्तिकी समस्तस्य निवृत्तिस्तमसो भवेत् ॥ ६५ ॥

विनिवृत्ते तमोजाले सर्वोपाधिनिबन्धने ।
नित्यानन्दघनज्ञानस्वभावः सम्प्रवर्तते ॥ ६६ ॥

In the last portion of the work, the author criticises Buddhistic doctrines. He says that the ultimate reality cannot be comprehended through the teachings of Buddha; it can only be realized through the Upanishadic teachings. Therefore, concludes the author, know the teachings of the Upanishads, discard the theories of other schools and realize the eternal supreme being–

विदित्वोपनिषच्छास्त्रं सर्वसंसिद्धिसाधनम् ।
मतान्तररतिं त्यक्त्वा नित्यं ब्रह्मैव भावयेत् ॥२०५॥

---

12. See verses from 134 to 166.

The work is written in a clear and lucid style. In certain places, conversational method is adopted. Almost all the important philosophical terms and most of the topics of the Vedānta philosophy are mentioned and discussed in the work.

I have been assisted in the publication of this work by Sri. A. Ramachandra Sastri, Research Officer and Sri. M. Madhavan Unni and Sri. E. Eswaran Namboodiri, Assistant Rsearch Officers of this Library.

MANUSCRIPTS LIBRARY
Trivandrum
17 - 3 - 1965.

K. Raghavan Pillai.
CURATOR.

॥ श्री ॥

॥ ब्रह्माद्वैतप्रकाशिका ॥

श्रीभाववागीशविरचिता ।

निरवधिसुखसंविन्नित्यनिर्लेपमेकं
कृतकगुणविहीनं पावनं तथ्यमेव ॥
अमरमजमनन्तं स्वप्रकाशं स्ववेद्यं
निरुपममखिलस्थं ब्रह्म पश्यन्ति धीराः ॥ १ ॥

पश्यन्ति परमात्मानं परमात्मानमात्मना ।
आत्मन्येवात्मविद्वांसो निरस्तद्वैतभावनाः ॥ २ ॥

इच्छाद्युपाधिविधुरो योऽहं कर्तेति मन्यते ।
स एवोपाधिनिर्मुक्तः परमात्मा न संशयः ॥ ३ ॥

उपाधिभेदविज्ञानं ब्रह्मणि द्वैतदर्शनम् ।
यन्मूलमेव संसारचक्रभ्रमणमद्भुतम् ॥ ४ ॥

यथैकाङ्गारिके वह्नौ ज्वालारूपेऽपि दाहिका ।
चिन्मयत्वं तथैकत्वं जीवात्मपरमात्मनोः ॥ ५ ॥

ज्वालालोकविशेषेण यथाग्निर्भासतेऽन्यथा ।
तत्त्वज्ञानविशेषेण परमात्मा तथात्मनः ॥ ६ ॥

अग्नेर्दीपसहस्रं चेज्जातं कार्यविशेषतः ।
तत्किं तद्भावमत्येति तथात्मा परमात्मताम् ॥ ७ ॥

अनन्तं परमात्मानं चक्षुरादिभिरिन्द्रियैः ।
कथं पश्यन्ति सम्मूढा दृढानन्दमतीन्द्रियम् ॥ ८ ॥

आद्यन्तवन्तः सर्वेऽपि भावा मिथ्या न संशयः ।
अनादिनिधनं सत्यं ब्रह्मैकममृतं परम् ॥ ९ ॥

दुस्तरापि दुरूहापि दुर्वचापि दुरत्यया ।
ब्रह्मणः समतालाभे मिथ्या मिथ्यैव नान्यथा ॥ १० ॥

सुसंस्कृतो मणिर्यद्वत् प्रकाशं लभते भृशम् ।
तथा ध्यानविशेषेण जीवात्मा परमः स्फुरेत् ॥ ११ ॥

भिन्ने घटे घटाकाशं नाकशाद् भिद्यते यथा ।
तथोपाधिनिवृत्तौ स्याज्जीव एव परः पुमान् ॥ १२ ॥

तस्यैकस्य विशुद्धस्य प्रागविद्यावृतिः कथम् ।
यद्वृतः क्षणिकज्ञानी जातोऽहमिति मन्यते ॥ १३ ॥

न तस्यावरणं माया न पुनः सापि वास्तवी ।
भावधर्मो यथाभावस्तथा किन्तु प्रतीयते ॥ १४ ॥

असत्यायास्त्वविद्यायाः संसारः सत्यभावना ।
नानात्मज्ञानरूपाऽसौ दृढैवानात्मदर्शिनाम् ॥ १५ ॥

अनिर्वाच्यैव सा माया दुस्तरैव न संशयः ।
सोऽहं सोऽहमिति ज्ञानं यद्बलात् कोऽहमित्यभूत् ॥१६॥

जाग्रत्स्वप्नसुषु(प्ता?प्ती)नां भ्रान्तिर्नानार्थदर्शिनी ।
सुखदुःखादिमूढानां चिरसंसारकारिणी ॥ १७ ॥

यदादि प्रथमो बन्धो महाभूतादिकल्पना ।
नानाचित्रावभासां तामनादिं कवयो विदुः ॥ १८ ॥

तद्धर्मं तस्य शक्तिं वा तस्य व्यावृत्तिमेव वा ।
मायामतत्त्वमेवाहुराचार्यास्तत्त्वदर्शिनः ॥ १९ ॥

ब्रह्मणः सन्निधानेऽपि न सा स्प्रष्टुं प्रगल्भते ।
सततं सहवासेऽपि पद्मपत्रमिवोदकम् ॥ २० ॥

इयं विचित्ररूपापि गुणग्रामभरालसा ।
माया मातङ्गकन्येव न ब्रह्म स्प्रष्टुमर्हति ॥ २१ ॥

जलानां सहजो धर्मो यथा निम्नाभिसर्पणम् ।
तथा स्वभाव एवास्य यन्मृषार्थप्रदर्शनम् ॥ २२ ॥

महाभूतानि सर्वाणि ब्रह्माण्डानि च कोटिशः ।
तदन्तर्लोकघटना चित्रं मायाविजृम्भितम् ॥ २३ ॥

तत्रापि देहिनश्चित्राः सर्वे नानार्थदर्शिनः ।
अहं प्रभुरयं दास एवं भूयोभिमानिनः ॥ २४ ॥

अग्नितः काष्ठसम्बन्धी यथा धूमः प्रवर्तते ।
तथा(स?स्य) ब्रह्मणः शक्तेर्विश्वमेतच्चराचरम् ॥ २५ ॥

उदासितुर्निरीहस्य निर्लेपस्य सुखात्मनः ।
सृष्ट्यादिकृति मायायां तद्विदः प्रभुता यशः ॥ २६ ॥

अविद्या भेदविज्ञानं जीवात्मपरमात्मनोः ।
कथञ्चिन्न स्पृशत्येव ब्रह्मैकत्वविदो जनान् ॥ २७ ॥

यदेकं परमं ब्रह्म सहजानन्दचिद्घनम् ।
तद्विदुर्वेदविद्वांसो नान्ये नानात्मदर्शिनः ॥ २८ ॥

अकृत्रिमेण शब्देन निर्दोषेण गुणस्पृशा ।
ब्रह्मैकत्वं यथा सिद्धं तदानेकग्रहेण किम् ॥ २९ ॥

अप्रमेयं परं ब्रह्म सत्यं मन्यामहे वयम् ।
त्वत्सिद्धेन प्रमाणेन त्वन्मतं प्रतिषिद्ध्यते ॥ ३० ॥

अध्यासविषयं सर्वं प्रमाणं नात्र संशयः ।
निरध्यासं परं ब्रह्म कथं गोचरतां नयेत् ॥ ३१ ॥

व्यवहारमपेक्ष्यैव श्रुत्या यदभिसूचितम् ।
द्वैतं सामान्यतोऽज्ञानं तद्यागादिप्रसिद्धये ॥ ३२ ॥

साध्यसाधनयोर्ज्ञाने स्वर्गापूर्वादिनिश्चयः ।
तत्सिद्धौ वैदिकं वाक्यं व्यवहाराय सार्थकम् ॥ ३३ ॥

यदि द्वे ब्रह्मणी सत्ये तदेकत्वश्रुतिः कथम् ।
मुक्तौ यदि तदेकत्वं संसारे कस्तदा ग्रहः ॥ ३४ ॥

परोक्षार्थविबोधी चेन्नागमः परमप्रमा ।
तदानुमानमप्यस्तं सद्भावे परमात्मनः ॥ ३५ ॥

नन्वात्मायमसर्वज्ञो यत्कर्म श्रद्धयाचरेत् ।
तत्सर्वमनुगृह्णाति सर्वज्ञः परमेश्वरः ॥ ३६ ॥

सत्यं न वेदवाक्यं ते सहकारि प्रवर्तते ।
कर्तृत्वं कल्पनासिद्धं किं तस्यानुग्रहेण वा ॥ ३७ ॥

नानुमानं प्रपञ्चस्य मृषात्वे द्वैतबाधकम् ।
देहादिग्राहकं दृष्टं प्रत्यक्षं नात्मनि क्षमम् ॥ ३८ ॥

योगिनो यदि पश्यन्ति द्वैतं प्रत्यक्षतः स्फुटम् ।
श्रुत्या नानुगृहीतं चेत् तात्कि प्राज्ञोऽनुमन्यते ॥ ३९ ॥

त्वमहंशब्दवाच्यत्वाद् द्वैतं चेल्लोकसम्मतम् ।
लोकमानमनोतीते कः प्रद्वेषस्तदद्वये ॥ ४० ॥

व्यवस्थाने न नानात्व नानात्वे न व्यवस्थितिः ।
यदि साद्धयेत तत्सिद्धयै तदान्योन्यपराहतिः ॥ ४१ ॥

नानात्वे न प्रमाणं चेत् तदन्यः कथमीश्वरः ।
अथासौ कार्यवैशिष्टयात् तत्सिद्धिर्नान्यथा कथम् ॥ ४२ ॥

विहाय संविदानन्दस्वभावं स परः पुमान् ।
यत्र तिष्ठति तद् ब्रूत बहिश्चेल्लोष्टमज्जडः ॥ ४३ ॥

अथ तस्यापि विज्ञानमप्रत्यक्षं विदुर्बुधाः ।
योगिनो यदि गृह्णन्ति स्वभिन्नमिति का प्रमा ॥ ४४ ॥

ब्रह्मैकं सच्चिदानन्दं सर्वदेहेषु संस्थितम् ।
उपाधीनामनेकत्वादनेकमिव भासते ॥ ४५ ॥

प्रस्फुटानुभवापन्नं हृदि शास्त्रोपदर्शितम् ।
इदमेव परं ब्रह्म मन्यतां को बहिर्भ्रमः ॥ ४६ ॥

स्वशरीरस्थमात्मानमेकं जानन्नपि स्फुटम् ।
बहिर्भ्रमति मूढात्मा तत्तत्परमिति ब्रुवन् ॥ ४७ ॥

अन्तश्चेन्नैव विश्वासो बहिष्ठः स कथं भवेत् ।
अन्तर्बहिश्चाविश्वासे दत्त्वा तस्याग्रहभ्रमा ॥ ४८ ॥१

ईश्वरस्याभ्युपायेऽपि सत्यस्यैकस्य चिन्तने ।
अलं जीवात्मनानात्वभ्रान्त्या भ्रान्तनिरायुषा ॥ ४९ ॥१

तत्वज्ञानेन भोगैर्वा निवृत्तौ सर्वकर्मणाम् ।
संस्कारस्यापि देहान्ते योऽस्ति शुद्धः स ईश्वरः ॥ ५० ॥

अथवा योगिभिर्धीरैर्ध्वस्तप्रचीनकर्मभिः ।
अन्तर्ध्यानदशा शुद्धो यो गृहीतः स ईश्वरः ॥ ५१ ॥

विभुर्निवृत्तकर्तव्यो नित्यतृप्तः सदा सुखी ।
नित्यशुद्धो विशुद्धात्मा यो जागर्ति स ईश्वरः ॥ ५२ ॥

यस्त्वविद्यापटापाये स्वप्रकाशः प्रकाशते ।
नित्यानन्दनिधिर्नित्यः स एकः परमेश्वरः ॥ ५३ ॥

ये चान्तर्द्वैतविन्निष्ठाः कर्मबाह्यबुद्धयः ।
सारूप्यमथ सामीप्यं सालोक्यं वा व्रजन्ति ते ॥ ५४ ॥

तस्माद्दृतामृतार्थित्वे विद्यमाने विपश्चितः ।
द्वैतभ्रमं विहायैव ब्रह्मैकं गच्छतानिशम् ॥ ५५ ॥

निपीयोपनिषद्विद्यां वीतरागादिविभ्रमः ।
युञ्जन्नेवात्मनात्मानं परं ब्रह्माधिगच्छति ॥ ५६ ॥

महामोहज्वरातीतः क्रोधापस्मारवर्जितः ।
रागोपरागरहितो मुनिर्भद्राणि पश्यति ॥ ५७ ॥

अणिमाद्याः स्फुरन्त्येव क्षोभयन्ति सुराङ्गनाः ।
वागुदेति विचित्रैव ध्यानभङ्गाय योगिनः ॥ ५८ ॥

विषयान् विषवद् दुष्टान् काळरात्रिवदङ्गनाः ।
संबन्धान् बन्धवत्कष्टान् यः पश्यति स आत्मवित् ॥५९॥

इन्द्रजालमिदं सर्वं पश्यन् स्वप्नमिवाथवा ।
ब्रह्मैकनिरतो धीरः प्रत्यूहैर्नाभिभूयते ॥ ६० ॥

अखण्डसच्चिदानन्दमखण्डाखण्डमण्डनम् ।
विश्वोपमागुणातीतं तदेकं ब्रह्म पश्यति ॥ ६१ ॥

समत्वं सर्वभूतेषु नाटकत्वोपजीविता ।
रागादितिमिरं हृत्वा परं ब्रह्मापदर्शयेत् ॥ ६२ ॥१

द्वैतं तु पश्यतो नित्यं संयतस्यापि सन्मुनेः ।
नापि वर्षसहस्रेण निष्ठा शान्तिरपि स्फुरेत् ॥ ६३ ॥

अन्तर्द्विखण्डमात्मानं ध्यायतो विफल(ः)श्रमः ।
बहिर्भावयतः शून्ये खपुष्पं फलदायकम् ॥ ६४ ॥

तदेकस्मिन्निजानन्दे स्वानुभूतिपथं गते ।
शशशृङ्गसमं द्वैतं कोऽनुमन्येत पण्डितः ॥ ६५ ॥

सर्वगं गगनाकारं जीवमानन्दचिद्घनम् ।
मत्वैवं परमात्मानं सदा पश्यन्ति सूरयः ॥ ६६ ॥

नन्वयं परमात्मा चेज्जीव एव सुखात्मकः ।
तत्किं दुःखादिसम्बन्धो देहे तस्योपलभ्यते ॥ ६७ ॥

यथेदं नीलमाकाशं यथासौ जलनीलिमा ।
तथा दुःखापवादोऽयं मिथ्या तस्याङ्गसङ्गतः ॥ ६८ ॥

देहादीनामिमे धर्माः जन्ममृत्युजरादयः ।
कथं तज्जनितं दुःखं हन्तात्मानमुपस्पृशत् ॥ ६९ ॥

आत्मनः सुखदुःखाभ्यां हानिवृद्ध्योरसंभवात् ।
कथं दुःखादिसन्धानं यन्मृषा जलचन्द्रवत् ॥ ७० ॥

परिच्छेद्यो मनोदेशश्चक्षुरादेश्च संस्थितिः ।
शरीरं चापरिच्छेद्ये कथं दुःखादिसंभवः ॥ ७१ ॥

प्रदेशविषयं दुःखं नानन्तं स्प्रष्टुमर्हति ।
यदि देहादिसम्बन्धादाकाशादेर्न तत्कथम् ॥ ७२ ॥

सुखदुःखादिभोगोऽयं तदध्यासस्य निश्चितः ।
तदन्ते तन्निवृत्तिः स्यान्नित्यं ब्रह्म सुखात्मकम् ॥ ७३ ॥

शीतो वायुर्यथा लोके सुगन्धि सलिलं यथा ।
यथोष्ण एव पाषाणस्तथा दुःखं वृथात्मनि ॥ ७४ ॥

इष्टालाभे तथानिष्टप्राप्तौ दुःखस्य सम्भवः ।
पर्याप्ताशेषकामस्य तद् द्वयं कथमात्मनः ॥ ७५ ॥

इच्छानिच्छा हि तद्द्वेष्यधर्माधर्मादि कल्पितम् ।
सुखं दुःखं कथं तत्र निर्लेपे तत्र तोषिणि ॥ ७६ ॥

यथादर्शे मुखाभासः सन्निधानं तथात्मनः ।
प्रतिबिम्बितचैतन्या बुद्धिर्दुःखादिभाजनम् ॥ ७७ ॥

स्थितं तत्प्राकृते काये महदादौ विकारिणि ।
निर्विकारमुदासीनं पुरुषं नैव निर्विशेत् ॥ ७८ ॥

सर्वं च प्राकृतं सर्गं प्रस्खलन्तमचेतनम् ।
हृष्यत्येष पुमान् पश्यन्नयस्कान्तसमक्रियः ॥ ७९ ॥

नन्वेषोऽपि बहिर्लोष्टः पार्थिवं च वपुर्धिया ।
नित्यमेवात्मना प्राप्तं कथमेकत्र वेदना ॥ ८० ॥

सत्यं न तत्र चित्तादि सामग्री नापि कल्पना ।
नाहंममाभिमानोऽपि सर्वं देहेऽस्ति तद् वृथा ॥ ८१ ॥

मृतदेहे तु सामग्री भोगादृष्टेन खण्डिता ।
तेन तत्र न चैतन्यं नापि दुःखादिसंभवः ॥ ८२ ॥

अदृष्टमपि धर्मोऽयं प्रतिबिम्बस्य नात्मनः ।
स च सर्वगतो नास्ति तेन लोष्टे न चेतना ॥ ८३ ॥

बहिर्जाज्वल्यमानेषु स्वात्मलग्नेषु वेश्मसु ।
स्वदाहानुभवाभावान्नादृष्टः सर्वतः स्थितः ॥ ८४ ॥

एवं सर्वशरीराणि स्वात्मप्राप्तानि यद्यपि ।
तथापि तत्प्रदेशित्वान्नानात्मत्वव्यवस्थितिः ॥ ८५ ॥

तस्मान्नानात्मविज्ञानं मिथ्योपाधिनिबन्धनम् ।
जानन्नेव भवेद् विद्वानेकस्मिन् ब्रह्मणि स्थितः ॥ ८६ ॥

एकमेव परं ब्रह्म परमं पुण्यमङ्गलम् ।
अनन्तं विष्णुमन्तस्थं सदा पश्यन्ति सूरयः ॥ ८७ ॥

तद्विष्णोरात्मनो नित्यं निरुपाधि परं पदम् ।
सर्वगं गगनाकारं सदा पश्यन्ति सूरयः ॥ ८८ ॥

ध्यानान्तर्लब्धमेकान्ते योगिनः परमामृतम् ।
यत्तत्त्वमुपजीवन्ति तद्विष्णोः परमं पदम् ॥ ८९ ॥

यदन्तर्ज्योतिरमृतं यस्मिन् सर्वं प्रतिष्ठितम् ।
यदपूर्वमिवाभाति तद्विष्णोः परमं पदम् ॥ ९० ॥

परं परेभ्यः परमं परेषां परापराणां पुरुषस्य पारम् ।
अपारपारं परमात्मरूपं न वेद वेदोऽपि कथं तु देही ॥९१॥

गुणधर्ममयी माया नानाचित्रावभासिनी ।
कथमेवात्र सम्ब(न्धाऽद्धा)निर्मले परमात्मनि ॥ ९२ ॥

कथं वा तदपायः स्यात् तद्बन्धोऽपि किमात्मनः ।
कीदृशी तस्य मुक्तिः स्यान्नित्यमुक्तस्य कथ्यताम् ॥९३॥

सत्यं नैवास्य सम्बद्धा नासम्बद्धा न चेतरा ।
अविद्या किन्त्वनिर्वाच्या सम्बन्धोऽपि तदात्मकः ॥९४॥

अविद्याविद्ययोर्द्वैतं तत्संबन्धानुयोजनम् ।
यथा यथैव शक्येत तथा सैव विजृम्भते ॥ ९५ ॥

यदा तु खल्वहं ब्रह्म सर्वमेवास्मि सर्वतः ।
तदासौ स्वदृढज्ञानात् स्वयमेव निवर्तते ॥ ९६ ॥

केचित् तां प्रकृतिं प्राहुः स्वविवेकान्निवर्तिनीम् ।
मिथ्याज्ञानं तथैवान्ये तत्त्वज्ञानान्निवृत्तिभाक् ॥ ९७ ॥

स्वतद्विवेकविज्ञानात् केचिदन्येष्वसत्सतोः ।
स्वज्ञानादेव नान्यस्मात् तन्निवृत्तिं विदुर्बुधाः ॥ ९८ ॥

तद्बन्धोऽपि प्रपञ्चात्मा सर्वः संसार एव च ।
मिथ्याज्ञानमदृष्टं वा मतिभेदादनेकधा ॥ ॥ ९९ ॥

बद्धोऽहमिति यज्ज्ञानं बहिर्भेदोपलम्भतः ।
स एव प्रथमो बन्धस्तद्भेदा एव चापरे ॥ १०० ॥

अहं दुःखी सुखी चेति योऽयं चित्तस्य सम्भ्रमः ।
स एव बन्धहेतुः स्यान्मुक्तस्य परमात्मनः ॥ १०१ ॥

सत्यत्वान्न प्रपञ्चाढ्यो निर्लेपत्वान्न भात्यसौ ।
सर्ववित्त्वान्न मिथ्यादृङ् नागुणत्वाददृष्टवान् ॥ १०२ ॥

आत्मासौ केवलः सत्यो निर्लेपः सर्वदृग्विभुः ।
निर्गुणो निष्क्रियः साक्षी बन्धः क्वास्य सुखात्मनः ॥१०३॥

उपाधिर्यदि बन्धोऽयं सोऽपि मिथ्यात्मकः कथम् ।
कथं तत्प्रतिभात्येष मिथ्या किं नावभासते ॥ १०४ ॥

दृष्टापह्नवकर्तारं कस्त्वां मन्येत वाग्मिनम् ।
सत्यं किं भवता दृष्टं मिथ्या चेन्नास्ति बाधकम् ॥ १०५ ॥

यत् प्राहुः परमं स्थानं (ब्रह्म?) परमैश्वर्यभास्वरम् ।
स्वस्थया विश्वनिर्माणविनोदं निग्रहादिकृत् ॥ १०६ ॥

अनादिं यद्यसंसारं सत्यं कर्म विचित्रितम् ।
ईश्वरानुग्रहान्मुक्तिं प्रत्येकमपरात्मनाम् ॥ १०७ ॥

तदसद्वेदविद्वांसो विदुरद्वैतवादिनः ।
ऐश्वर्यमपि मायैव कथं सा तत्र निर्गुणे ॥ १०८ ॥

अथाहुरपरे केचित् तस्यैव परमात्मनः ।
स्वसर्वविषयज्ञानद्वयमेव निराविलम् ॥ १०९ ॥

यदा स्वविषयज्ञानी तदा विश्वं निवर्तते ।
यदासावस्वविषयज्ञानी तज्जायते तदा ॥ ११० ॥

इदमप्यनुपादेयमखण्डज्ञानखण्डनात् ।
नाद्रियन्ते परब्रह्मदृशो वेदविदो जनाः ॥ १११ ॥

नान्ये बन्धं न वा मोक्षं नित्यमुक्तस्य वृण्वते ।
बन्धमोक्षाविमौ धर्मविकृतार्थस्य सम्मतौ ॥ ११२ ॥

पूर्ववत् पुनरापत्तेर्नागन्तुर्बन्ध इष्यते ।
नानादिर्नित्यमुक्तस्य बन्धापेक्षं च मोक्षणम् ॥ ११३ ॥

एकबन्धं च तस्यान्ते संसारोच्छेदमेव च ।
ब्रूयास्त्वेतदपि प्रायो न मनोहारि धीमताम् ॥ ११४ ॥

तस्मादनात्मविज्ञा(नः?नात्) पुंसो बन्धस्तदत्यये ।
सहजानुभवानन्दव्यक्तिर्मुक्तिर्निगद्यते ॥ ११५ ॥

अथवानुपमानं तु प्रबोधप्रमदोदयः ।
निवृत्तौ तमसो मुक्तिर्नित्यज्ञानसुखोदयः ॥ ११६ ॥

न चेयं कर्मणा लभ्या कर्मारम्भकमुच्यते ।
तस्य ज्ञानपरत्वे वा कैवारादुपकारिता ॥ ११७ ॥

प्रत्यवायजिहासार्थं नित्यं कर्म समाचरन् ।
सन्न्यस्तस्संशयानो हि वृथा क्लिश्यति दुर्मतिः ॥ ११८ ॥

प्रत्यवायस्य विप्रत्वादवश्यंभाविता यदि ।
प्रकृतेरधिकारित्वे क्वाभावाद् भावसंभवः ॥ ११९ ॥

नित्याकरणसंभाव्यो यो वान्यकरणोद्भवः ।
प्राप्यवायः स विद्वांसं बाधते नात्मनि स्थितम् ॥ १२० ॥

पुत्रेषणादिकाम्यानां सन्न्यासं सन्न्यसे वृथा ।
सर्वकर्मफलत्यागं तमाहुर्ब्रह्मवेदिनः ॥ १२१ ॥

काष्ठभारभरव्यग्रः कर्म कर्मेति कीर्तयन् ।
अग्निहोत्रादिकं कृत्वा शिखी मूढ न लज्जसे ॥ १२२ ॥

तत्कामिकमकामं वा कर्म बन्धकरं परम् ।
कृत्तिकाभिर्जलं पीतं किं न गर्भमजीजनत् ॥ १२३ ॥

अचेतनमिदं कर्मज्ञानं कर्म च चेतनम् ।
तयोस्समुच्चयः क्वासौ मुमुक्षुर्येन भास्करः ॥ १२४ ॥

ज्ञानान्तं ज्ञानपूर्वं च ज्ञानमध्यं यदीच्छसि ।
कर्मज्ञानाविनाभूतं तज्ज्ञानं भज केवलम् ॥ १२५ ॥

तस्मान्न कर्मतो नान्यविज्ञानान्न समुच्चयात् ।
मुक्तिः संप्राप्यते किन्तु प्रज्ञानादेव केवलात् ॥ १२६ ॥

कथं तमोनिवृत्तिः स्यात् केनात्मज्ञानमुत्तमम् ।
परमार्थोपलम्भे वा साधनं किञ्चिदुच्यताम् ॥ १२७ ॥

श्रवणं वेदवाक्यानां तदर्थस्य विचारणम् ।
प्रमाणैर्मननं ध्यानं निदिध्यासनमेव च ॥ १२८ ॥

सद्गुरोरुपदेशेन भूयो भूयो विलोकनम् ।
दर्शनं हृदये तस्य साक्षात्कारस्य साधनम् ॥ १२९ ॥

सिद्धये श्रवणादीनां लिङ्गी धर्मरतिर्भवेत् ।
योगाभ्यासं च कुर्वीत श्रद्धया विजितेन्द्रियः ॥ १३० ॥

चित्तवृत्तेर्निरोधो यः स योगः कैश्चिदुच्यते ।
निर्मलेन हृदा कैश्चित् पुरुषेश्वरयोजनम् ॥ १३१ ॥

मनःप्रसन्नता कैश्चित् करणग्रामनिग्रहात् ।
धन्यैस्तु सर्वतः साम्यादौदासीन्यमुदाहृतम् ॥ १३२ ॥

सिद्ध्यसिद्ध्योस्समत्वं यत् स योगः परमोत्तमः ।
नेष्टसिद्धौ सरागित्वं नेष्टासिद्धौ विरागता ॥ १३३ ॥

स चाष्टाङ्गः षडङ्गो वा पञ्चाङ्गो वापि साधनम् ।
साधयन्ति द्विजा येन पुरुषार्थचतुष्टयम् ॥ १३४ ॥

अङ्गान्येतानि तस्याष्टौ यमाश्च नियमस्तथा ।
आसनं प्रमाणनियमः प्रत्याहारश्च धारणा ॥ १३५ ॥

ध्यानं समाधिरेवेति षडङ्गस्य तु न द्वयम् ।
नासनं नापि नियमः पञ्चाङ्गस्य यमाश्च न ॥ १३६ ॥

अहिंसा ब्रह्मचर्याद्या यमास्ते दश पञ्च च ।
देशकालाद्यनाकाङ्क्षा यावज्जीवानुवर्तिनः ॥ १३७ ॥

नियमाः स्नानसन्ध्याद्या देशकालाद्यपेक्षिणः ।
अनवच्छिन्नसंख्यास्ते वर्णाश्रमविभागतः ॥ १३८ ॥

पद्मकस्वस्तिकादीनामासनानां यथासुखम् ।
चतुर्भिरधिकाशीतिश्रुतात् किन्त्वेकमासनम् ॥ १३९ ॥

प्रणम्य देवदेवेशं जगतां गुरुमीश्वरम् ।
प्राणायामं प्रकुर्वीत प्रागुदङ्मुख एव वा ॥ १४० ॥

सुखासनसमासीनो नाडीकोष्ठं च शोधयेत् ।
तद्गतं दुष्टपवनं हठेनापि विरेचयेत् ॥ १४१ ॥

त्रिधोन्नतं वपुः कृत्वा श्लथगात्रः समाहितः ।
शनैर्नासिकया धीरो गृह्णीत पवनं ततः ॥ १४२ ॥

आपूर्य कुम्भवत्कोष्ठं तं यथाशक्ति कुम्भयन् ।
पूर्णकुम्भनिभस्तिष्ठेत् यावन्मात्रास्त्रयोदश ॥ १४३ ॥

शक्तौ मात्राधिकस्तिष्ठन्नुत्तरोत्तरशः क्रमात् ।
द्वात्रिंशन्मात्रका यावत् कुर्यात् कुम्भकमुत्तमम् ॥ १४४ ॥

तत उद्घातकैः कोष्ठं वायुमन्तर्निवेशयेत् ।
उद्घातत्रितयादूर्ध्वमुत्तमं वा समाचरेत् ॥ १४५ ॥

शङ्खिनीविवरेणैवमन्योन्यस्यान्तरूर्ध्वगम् ।
तेनैव सहितं वायुं शनैर्नासिकया त्यजेत् ॥ १४६ ॥

श्वासान्तवर्तिना वायुः सकारेणाथ गृह्यते ।
मुच्यते तु हकारेण शङ्खिनीरन्ध्रमूर्च्छना ॥ १४७ ॥

यथा तूलमपि क्षिप्तं नासाग्रे न प्रकम्पयेत् ।
शनैः शनैस्तथा वायुर्मोचनीयः प्रयत्नतः ॥ १४८ ॥

वामेन ग्रहणं कृत्वा दक्षिणेनास्य मोक्षणम् ।
घ्राणेन प्रणवध्यायी मुच्यते सर्वकिल्बिषैः ॥ १४९ ॥

रेचकं पूरकं चैव कुम्भकं च त्रिकात्मकम् ।
प्राणायामं परं प्राहुः पापघ्नं चित्तशुद्धिदम् ॥ १५० ॥

निर्बीजं च सबीजं च प्राणायाममहर्निशम् ।
कुर्वन् नित्याभियोगेन परां शुद्धिमवाप्नुयात् ॥ १५१ ॥

वपुःपाटवमत्यन्तं कण्ठे च स्वरसौष्ठवम् ।
परं रूपादिलावण्यं जितवायोः प्रशस्यते ॥ १५२ ॥

प्राणायामविशुद्धात्मा यस्मात् पश्यति तत् परम् ।
दुर्लभं परमं ब्रह्म तस्मात् कुर्वीत तं सदा ॥ १५३ ॥

भ्रमतां चक्षुरादीनामिन्द्रियाणां समन्ततः ।
प्रत्याहरणमर्थेभ्यः प्रत्याहारः स उच्यते ॥ १५४ ॥

अथवा तद्वशीकारः स्वाधिष्ठानविलम्बतः ।
मनसापि न संक्षोभ्यो नार्थिर्वा यः स उत्तमः ॥ १५५ ॥

चक्षुरादिप्रसङ्गेभ्यो विकल्पेभ्योऽपि तद्बलात् ।
मनसो धारणं देशे हृदि सा धारणा मता ॥ १५६ ॥

अतीतानागतार्थेषु दृढसंस्कारवर्तिषु ।
दुस्संकल्पविकल्पेभ्यो निवृत्तिर्मनसोऽपि वा ॥ १५७ ॥

निवृत्ते करणग्रामे चित्ते निश्चलतां गते ।
तत्रैकतानुसन्धानं हृदि ध्यानमुदाहृतम् ॥ १५८ ॥

विश्वाकारमजं शुद्धं सत्यमात्मानमव्ययम् ।
बु(द्धचा?दृध्वा)ह्यात्मदृशा सम्यग्ध्या(न?ने) तन्मयता दृढा ॥

बहिर्भेदं विरोधं च तदेकत्वेन पश्यतः ।
यत्रान्यथा मतिर्न स्यात् तद् ध्यानं परमं मतम् ॥ १६० ॥

ध्यानस्यातिप्रकर्षो यः स समाधिर्निगद्यते ।
(अन्तस्तत्त्वप्रकाशश्चदानं दानमवैथवा(?)
अन्तस्तत्त्वप्रकाशे हि नादानं हानमेव वा) ॥ १६१ ॥

यत्रान्तर्लीनचित्तस्य शङ्खभेर्यादिनिस्स्वनैः ।
अपि स्पर्शेन न क्षोभः स समाधिपरो मतः ॥ १६२ ॥

निर्वातनिश्चलावस्थप्रदीपकलिकोपमम् ।
अन्तस्तत्त्वं समालोक्य यः सुखी स समाधिमान् ॥ १६३ ॥

तदेवं सह योगेन साधनैः श्रवणादिभिः ।
साध्यते तत्त्वविज्ञानं यदात्मज्ञानमुत्तमम् ॥ १६४ ॥

ततस्तेनात्मबोधेन परिपक्वेन योगिनः ।
आत्यन्तिकी समस्तस्य निवृत्तिस्तमसो भवेत् ॥ १६५ ॥

विनिवृत्ते तमोजाले सर्वोपाधिनिबन्धने ।
नित्यानन्दघनज्ञानस्वभावः सम्प्रवर्तते ॥ १६६ ॥

तं प्राप्य कृतकृत्यः स्यात् परमात्मैव केवलः ।
सोपाधिर्यावदेवासौ तावज्जीवात्मसंज्ञितः ॥ १६७ ॥

निजस्वभावसम्पन्नः सत्यशब्दार्थसूचितः ।
परमार्थः पुमानेष तस्य ज्ञानं कृतार्थता ॥ १७८ ॥

तस्मात् कृतादरैरेभिः साधनैः श्रवणादिभिः ।
साध्यते तत्त्वविज्ञानं यन्महामोहनाशनम् ॥ १६९ ॥

अणोरणीयान् महतो महीयान्
परः परेभ्यः परमः पुमानयम् ।
अनादिवृद्धोऽपि सदा यवीयान्
स रत्नभूतो हृदये विमृश्यताम् ॥ १७० ॥

कथमेतदसम्बन्धं भवानाह यदृच्छया ।
अतथ्यैः साधनैरेभिस्तथ्यज्ञानोदयः कथम् ॥ १७१ ॥

निदिध्यासनमात्मस्थं तदनुष्ठानमुत्तमम् ।
यथाह वितथं तथ्ये कथं तत् परिगृह्यते ॥ १७२ ॥

सत्यमेतत् त्वया पृष्टं किन्तु नाद्वैतसम्मतम् ।
बहिर्भेदोपलम्भान्धाः के यथार्थावलोकिनः ॥ १७३ ॥

असत्यं साधनं सर्वमसत्यस्तत्परिग्रहः ।
असत्यं तदनुष्ठानं किन्त्वात्मा सत्य एव सः ॥ १७४ ॥

असत्यादपि सत्यस्य सम्प्राप्तिः परिगीयते ।
वेदवृद्धैस्तथा लोके सुप्तावस्थस्य दृश्यते ॥ १७५ ॥

ध्यायन्नेव यथादृष्टां सुप्तः कामी मृगेक्षणाम् ।
मिथ्यासम्भोगतः सत्यं रेतःक्षरणमीक्षते ॥ १७६ ॥

तथैव श्रवणादिभ्यो वितथेभ्योऽपि तद्विदः ।
निदिध्यासयतः सत्यं परं ब्रह्मावभासते ॥ १७७ ॥

तदेव विमलं सत्यं परमेकं निरन्तरम् ।
चिन्तयन्तो हृदि प्राज्ञा उच्यन्ते नात्र संशयः ॥ १७८ ॥

अथेदं किंचिदत्रापि पृच्छ्यते चेन्न कुप्यसि ।
तथा बुद्धादिवाक्येभ्यः सत्यं किं नाधिगम्यते ॥ १७९ ॥

अहो मोहस्य माहात्म्यं योऽयं सर्वत्र सम्भ्रमः ।
सत्यत्वमपि किं भ्रातर्भवता न श्रुतं पुरा ॥ १८० ॥

सत्यत्वं त्रिविधं दृष्टं व्यवहारावभासयोः ।
परमार्थे च किन्त्वेतद् बुद्धवाक्येषु दुर्घटम् ॥ १८१ ॥

अध्यासो व्यपदेशस्तु व्यवहारोऽपि स द्विधा ।
देहाद्युपाध्यवच्छेदः पूर्वोऽन्यः शास्त्रसम्भवः ॥ १८२ ॥

नायमध्यासरूपोऽपि संगतः सौगते मते ।
प्रतिक्षणविनाशित्वात् चित्तात्मादेर्ध्रुवात्मनः ॥ १८३ ॥

व्यवहारस्तु शास्त्रीयः श्रुतिस्मृतिविपर्ययः ।
त्रैवर्णिकव्यवस्थात्मा स्वर्गमोक्षापदेशिकः ॥ १८४ ॥

एकवर्णात्मकैर्म्लेच्छैराशौचैः श्रुतिवैरिभिः ।
सोऽपि नाभ्युपगम्येत कथं तद्वाक्यसत्यता ॥ १८५ ॥

यत् प्रातिभासिकं शुक्तौ रजतादेर्विकल्पतः ।
बुद्ध्योपदर्शितं भ्रान्त्या सत्यत्वं तदसंगतम् ॥ १८६ ॥

तदेव यदि मन्यन्ते सर्वार्थप्रतिभासकम् ।
तदिदं व्यवहारस्य सत्यत्वे नापि बाध्यते ॥ १८७ ॥

तथाकाशलतादीनामसद्रूपतया स्थिते ।
सत्यार्थसिद्धिहेतुत्वं शशशृङ्गस्य कल्प्यताम् ॥ १८८ ॥

आत्मैव परमार्थोऽयं तस्य सत्यत्वमिष्यते ।
तस्यापि (क्ष)णभङ्गित्वे सत्यत्वं कुत्र तन्मते ॥१८९॥

एकमक्षणिकं सत्यं पारमार्थिकमुत्तमम् ।
तत्त्वं यस्य मते नास्ति तस्य सत्या गतिः कुतः ॥१९०॥

असत्यात् सत्यसंप्राप्तिः पूर्वाचार्यैर्नियम्यते ।
असत्यस्यैव नासत्यात् किन्तु सा सौगते मते ॥ १९१ ॥

तेन बुद्धादिवाक्येभ्यः सत्यप्राप्तिर्न संभवेत् ।
सत्यमक्षणिकं ब्रह्म यतस्तैर्नाधिगम्यते ॥ १९२ ॥

नानुमानशतेनापि क्षणिकं ब्रह्म गृह्यते ।
साध्यसाधनयोरैक्ये नानुमापि प्रवर्तते ॥ १९३ ॥

कार्यकारणयोर्भेदः क्व वा लोकेऽपि संमतः ।
लोहसाधनयोरैक्ये नानुमापि प्रवर्तते ॥ १९४ ॥

सुवर्णं कुण्डलाकारपरिणामि यथा जने ।
सुवर्णमेव नैवान्यत् तथा कार्यं च कारणम् ॥ १९५ ॥

घटाकारेण मृत्पिण्डः परिणाममुपागतः।
(स) मृदेव न सन्देहस्तथा तन्त्वादयः पटाः ॥ १९६ ॥

एवं सर्वेषु कार्येषु कारणस्य (दशा?तदा)त्मनः।
सन्निवेशविशेषेण परिणामो विजृम्भते ॥ १९७ ॥

विजातीयस्य चक्रादेः परिणामो न तद्गतः।
सजातीयेन तस्यापि स परम्परया गतः ॥ १९८ ॥

सजातीयविजात्योर्वा भेदोऽयं सन्निवेशजः।
पृथ्वी यथा घटाकारा पटाकारा विलक्षणा ॥ १९९ ॥

तस्मादनादिमध्यान्तमप्रमेयं पुरातनम्।
क्षणभङ्गि कथं दृष्टं ब्रह्म पाषण्डिभिः परैः ॥ २०० ॥

सहस्रयोजनायामं शशशृङ्गं सुसिद्धिदम्।
एवं वदन्तः पाषण्डा वैदिकैर्गलह(स्त?स्ति)ताः ॥ २०१ ॥

दर्शनं चैव पाषण्डं विद्याविद्ये ऋतानृते।
मोक्षधामप्रवेशाय द्वारमद्वारमेव च ॥ २०२ ॥

तस्मादलं प्रतापेन तत्त्व(।?)दृष्ठतशातिना।
वियल्लताफलास्वादनिर्जरा ... फल्गुना ॥ २०३ ॥

तदेकं परमं सत्यं ब्रह्म मत्वा सनातनम्।
मतान्तराणि सर्वाणि मिथ्यारूपाणि निर्णयेत् ॥ २०४ ॥

विदित्वोपनिषच्छास्त्रं सर्वसंसिद्धिसाधनम्।
मतान्तररतिं त्यक्त्वा नित्यं ब्रह्मैव भावयेत् ॥ २०५ ॥

जितासनो जितहारो जितनिद्रो जितेन्द्रियः ।
तत्त्वज्ञानविशुद्धात्मा पश्येदात्मानमीश्वरम् ॥ २०६ ॥

तदेनमन्तर्गतमेव सन्ततं
भजन्तु भक्त्या पुरुषं पुरातनम् ।
इदं मुनीन्द्रा हृदये सुदुर्वहं
वहन्ति नित्यं परमार्थसिद्धये ॥ २०७ ॥

अयं समस्ते जगति प्रतिष्ठितः
प्रतिष्ठितं सर्वमनेन वा जगत् ।
अयं जगद्बीजमयं जगत्पति-
र्जगन्निवासोऽयमयं परः पुमान् ॥ २०८ ॥

अयं स विष्णुर्भगवान् जगत्प्रभुः
प्रभुर्विभुः शम्भुरयं महेश्वरः ।
अयं स्वयम्भूः प्रतिभूः फलार्पणे
फलार्थिनामप्ययमेव सत्फलम् ॥ २०९ ॥

अयं स पूज्यः सकलैः स्वकर्मभिः
संसारयज्ञोऽयमयं स तद्विधिः ।
अयं स सोमः खलु यज्विनां प्रियः
स्तुवन्ति चैनं श्रुतयः फलप्रदम् ॥ २१० ॥

अयं निधानं परमं मनीषिणा-
मयं परं मङ्गलमेव दुर्लभम् ।
अयं परं तत्त्वमयं न लिप्यते
परोरजोभिर्विगुणैर्गुणैरपि ॥ २११ ॥

स्वतः प्रकाशोऽयमयं प्रकाशनः
प्रकाशभासां महसां निधेरपि ।
प्रमाणनेत्रैरयमेव मृग्यते
मुदां परं धाम सुसम्पदां निधिः ॥ २१२ ॥

इमं विदुर्न्यायविदो विशारदा
विशेषविद्यागुरुमीश्वरं परम् ।
जगद्विधातारमनन्तमव्ययं
जगन्नियन्तारमजं जयप्रदम् ॥ २१३ ॥

सदव्ययं तत्त्वमनर्घ्यम(र्घ्य?र्च्य)ते
चिदेकदेहं वशिभिर्मुनीश्वरैः ।
हृदि स्थितं यद्विमलं समाधिना
तदेव नित्यं पुरु(षो?षे)ऽनुभूयताम् ॥ २१४ ॥

अ(य?ल)मलं बहुयुक्तिनिरूपणैः
कृतमशेषसुतीर्थगतश्रमैः ।
किमथवा विहितेन हठेन वा
हृदि परिस्फुरति ध्रुवमात्मनि ॥ २१५ ॥

शरणमेकमनादिमनामयं
सकललोकविकल्पनकारणम् ।
अखिलतत्त्वपरा(वि?व)धिमीश्वरं
विश परं पुरुषं हृदये सदा ॥ २१६ ॥

इति मुषितविशेषं सर्वमद्वैतशास्त्रं
कतिपयपदवाक्यैर्ब्रह्मसिद्धान्तसारम् ।
अनुदिनममुना हृन्नेत्रमुन्मील्य पश्येत्
परमपुरुषमन्तर्ज्ञानसिद्धान्तजेन ॥ २१७ ॥

वेदान्तसारमुद्धृत्य योगानुष्ठानसिद्धये ।
इयं संक्षेपतः प्रोक्ता ब्रह्माद्वैतप्रकाशिका ॥ २१८ ॥

इति श्रीभाववागीश्वरविरचिता
ब्रह्माद्वैतप्रकाशिका समाप्ता ॥

श्लोकानुक्रमणी ।

श्लोकादिः	श्लोकसंख्या	श्लोकादिः	श्लोकसंख्या
अकृत्रिमेण शब्देन	२९	अनिर्वाच्यैव सा माया	१६
अखण्डसच्चिदानन्द	६१	अन्तर्द्विखण्डमात्मानं	६४
अग्नितः काष्ठसंबन्धी	२५	अन्तश्चेन्नैव विश्वासो	४८
अग्नेर्दीपसहस्रं चेत्	७	अप्रमेयं परं ब्रह्म	३०
अङ्गान्येताति तस्याष्टौ	१३५	अयं निधानं परमं	२११
अचेतनमिदं कर्म	१२४	अयं स पूज्यः सकलैः	२१०
अणिमाद्याः स्फुरन्त्येव	५८	अयं समस्ते जगति	२०८
अणोरणीयान् महतो	१७०	अयं स विष्णुर्भगवान्	२०९
अतीतानागतार्थेषु	१५७	अ(य?ल)मलं बहुयुक्ति	२१३
अथ तस्यापि विज्ञानं	४४	अविद्या भेदविज्ञानं	२७
अथवा तद्वशीकारः	१५५	अविद्याविद्ययोर्द्वैतं	९५
अथवानुपमानं तु	११६	असत्यं साधनं सर्वं	१७४
अथवा योगिभिर्धीरैः	५१	असत्यात् सत्यसम्प्राप्तिः	१९१
अथाहुरपरे केचित्	१०९	असत्यादपि सत्यस्य	१७५
अथेदं किञ्चिदत्रापि	१७९	असत्यायास्त्वविद्यायाः	१५
अदृष्टमपि धर्मोऽयं	८३	अहं दुःखी सुखी चेति	१०१
अध्यासविषयं सर्वं	३१	अहिंसाब्रह्मचर्याद्या	१३७
अध्यासो व्यपदेशस्तु	१८२	अहो मोहस्य माहात्म्यं	१८०
अनन्तं परमात्मानं	८	आत्मनः सुखदुःखाभ्यां	७०
अनादि यद्यसंसारं	१०७	आत्मासौ केवलः सत्यो	१०३

श्लोकादिः	श्लोकसंख्या	श्लोकादिः	श्लोकसंख्या
आत्मैव परमार्थोऽयं	१८९	काष्ठभारभरव्यग्रः	१२२
आद्यन्तवन्तः सर्वेऽपि	९	केचित् तां प्रकृतिं प्राहुः	९७
आपूर्य कुम्भवत् कोष्ठं	१८३	गुणधर्ममयी माया	९२
इच्छाद्युपाधिविधुरो	३	घटाकारेण मृत्पिण्डः	१९६
इच्छानिच्छा हि तद्द्वेष्य	७६	चक्षुरादिप्रसङ्गेभ्यो	१५६
इति मुषितविशेषं	२१७	चित्तवृत्तेर्निरोधो यः	१३१
इदमप्यनुपादेयं	१११	जलानां सहजो धर्मो	२२
इन्द्रजालमिदं सर्वं	६०	जाग्रत्स्वप्नसुषुप्तीनां	१७
इमं विदुर्न्यायविदो	२१३	जितासनो जिताहारो	२०६
इयं विचित्ररूपापि	२१	ज्ञानान्तं ज्ञानपूर्वं च	१२५
इष्टालाभे तथानिष्ट	७५	ज्वालालोकविशेषेण	६
ईश्वरस्याभ्युपायेऽपि	४९	तं प्राप्य	१६८
एकबन्धं च तस्यान्ते	११४	तत उद्घातकैः कोष्ठं	१४५
एकमक्षणिकं सत्यं	१९०	ततस्तेनात्मबोधेन	१६५
एकमेव परं ब्रह्म	८७	तत्कामिकमकामं वा	१२४
एकवर्णात्मकैर्म्लेच्छै	१८५	तत्त्वज्ञानेन भोगैर्वा	५०
एवं सर्वशरीराणि	८५	तत्रापि देहिनश्चित्राः	२८
एवं सर्वेषु कार्येषु	१९७	तथाकाशलतादीनां	१८८
उदासितुर्निरीहस्य	२६	तथैव श्रवणादिभ्यो	१७७
उपाधिभेदविज्ञानं	४	तदसद्वेदविद्वांसो	१०८
उपाधिर्यदि बन्धोऽयं	१०४	तदेकं परमं सत्यं	२०४
कथमेतदसम्बन्धं	१७१	तदेकस्मिन्निजानन्दे	६५
कथं तमोनिवृत्तिः स्यात्	१२७	तदेनमन्तर्गतमेव	२०७
कथं वा तदपायः स्यात्	९३	तदेवं सह योगेन	१६४
कार्यकारणयोर्भेदः	१९४	तदेव यदि मन्यन्ते	१८७

श्लोकादिः	श्लोकसंख्या	श्लोकादिः	श्लोकसंख्या
तदेव विमलं सत्यं	१७८	न तस्यावरणं माया	१४
तद्धर्मं तस्य शक्तिं वा	१९	नन्वयं परमात्मा चेत्	६७
तद्बन्धोऽपि प्रपञ्चात्मा	९९	नन्वात्मायमसर्वज्ञो	३६
तद्विष्णोरात्मनो नित्यं	८८	नन्वेषोऽपि बहिर्लोष्टः	८०
तस्मात्कृतादरैरेभिः	१६९	नानात्वे न प्रमाणं चेत्	४२
तस्मादनात्मविज्ञानात्	११५	नानुमानं प्रपञ्चस्य	३८
तस्मादनादिमध्यान्तं	२००	नानुमानशतेनापि	१९३
तस्मादलं प्रतापेन	२०३	नान्ये बन्धं न वा मोक्षं	११२
तस्मादतामृतार्थित्वे	५५	नायमध्यासरूपोऽपि	१८३
तस्मान्न कर्मतो नान्य	१२६	निजस्वभावसम्पन्नः	१६८
तस्मान्नानात्मविज्ञानं	८६	नित्याकरणसंभाव्यो	१२०
तस्यैकस्य विशुद्धस्य	१३	निदिध्यासनमात्मस्थं	१७२
तेन बुद्धादिवाक्येभ्यः	१९२	निपीयोपनिषद्भ्यां	५६
त्रिधोन्नतं वपुः कृत्वा	१४२	नियमाः स्नानसन्ध्याद्या	१३८
त्वमहंशब्दवाच्यत्वात्	४०	निरवधिसुखसंविन्नित्य	१
दर्शनं चैव पाषण्डं	२०२	निर्बीजं च सबीजं च	१५१
दुस्तरापि दुरूहापि	१०	निर्वातनिश्चलावस्थ	१६३
दृष्टापह्नवकर्तारं	१०५	निर्वृत्ते करणग्रामे	१५८
देहादीनामिमे धर्माः	६९	पद्मकस्वस्तिकादीनां	१३९
द्वैतं तु पश्यतो नित्यं	६३	परं परेभ्यः परमं	९१
ध्यानं समाधिरेवेति	१३६	परिच्छेद्यो मनोदेशः	७१
ध्यानस्यातिप्रकर्षो यः	१६१	परोक्षार्थावबोधी चेत्	३५
ध्यानान्तर्लब्धमेकान्ते	८९	पश्यन्ति परमात्मानं	२
ध्यायन्नेव यथादृष्टां	१७६	पुत्रेषणादिकाम्यानां	१२१
न चेयं कर्मणा लभ्या	११७	पूर्ववत्पुनरापत्तेः	११३

श्लोकादिः	श्लोकसंख्या	श्लोकादिः	श्लोकसंख्या
प्रणम्य देवदेवेशं	१४०	यदन्तर्ज्योतिरमृतं	९०
प्रत्यवायजिहासार्थं	११८	यदा तु खल्वहं ब्रह्म	९६
प्रत्यवायस्य विप्रत्वात्	११९	यदादि प्रथमो बन्धो	१८
प्रदेशाविषयं दुःखं	७२	यदि द्वे ब्रह्मणी सत्ये	३४
प्रस्फुटानुभवापन्नं	४६	यदेकं परमं ब्रह्म	२८
प्राणायामविशुद्धात्मा	१५३	यस्त्वविद्यापटापाये	५३
बद्धोऽहमिति यज्ज्ञानं	१००	ये चान्तर्द्वैतवन्निष्ठाः	५४
बहिर्जाज्वल्यमानेषु	८४	योगिनो यदि पश्यन्ति	३९
बहिर्भेदं विरोधं च	१६०	रेचकं पूरकं चैव	१५०
ब्रह्मणः सन्निधानेऽपि	२०	वपुःपाटवमत्यन्तं	१५२
ब्रह्मैकं सच्चिदानन्दं	४५	वामेन ग्रहणं कृत्वा	१४९
भिन्ने घटे घटाकाशं	१२	विजातीयस्य चक्रादेः	१९८
भ्रमतां चक्षुरादीनां	१५४	विदित्वोपनिषच्छास्त्रं	२०५
मनःप्रसन्नता केश्चित्	१३२	विनिवृत्ते तमोजाले	१६६
महाभूतानि सर्वाणि	२३	विभुर्निवृत्तकर्तव्यो	५२
महामोहज्वरातीतः	५७	विश्वाकारमजं शुद्धं	१५९
मृतदेहे तु सामग्री	८२	विषयान् विषवद्	५९
यत् प्रातिभासिकं शुक्तौ	१८६	विहाय संविदानन्द	४३
यत् प्राहुः परमं	१०६	वेदान्तसारमुद्धृत्य	२१८
यत्रान्तर्लीनचित्तस्य	१६२	व्यवस्थाने न नानात्व	४१
यथा तूलमपि क्षिप्तं	१४८	व्यवहारमपेक्ष्यैव	३२
यथादर्शे मुखाभासः	७७	व्यवहारस्तु शास्त्रीयः	१८४
यथा स्वविषयज्ञानी	११०	शक्तौ मात्राधिकस्तिष्ठन्	१४४
यथेदं नीलमाकाशं	६८	शङ्खिनीविवरेणैवं	१४६
यथैकाङ्गारिके वह्नौ	५	शरणमेकमनादि	२१६

श्लोकादिः	श्लोकसंख्या	श्लोकादिः	श्लोकसंख्या
शीतो वायुर्यथा लोके	७४	सर्वं च प्राकृतं सर्गं	७९
श्रवणं वेदवाक्यानां	१२८	सर्वगं गगनाकारं	६६
श्वासान्तर्वर्तिना वायुः	१४७	सहस्रयोजनायामं	२०१
स चाष्टाङ्गः षडङ्गो वा	१३४	साध्यसाधनयोर्ज्ञाने	३३
सजातीयविजात्योर्वा	१९९	सिद्ध्ये श्रवणादीनां	१३०
सत्यं न तत्र चित्तादि	८१	सिद्ध्यसिद्ध्योस्समत्वं	१३३
सत्यं न वेदवाक्यं ते	३७	सुखदुःखादिभोगोऽयं	७३
सत्यं नैवास्य संबद्धा	९४	सुखासनसमासीनो	१४१
सत्यत्वं त्रिविधं दृष्टं	१८१	सुवर्णं कुण्डलाकार	१९५
सत्यत्वान्न प्रपञ्चाख्यो	१०२	सुसंस्कृतो मणिर्यद्वत्	११
सत्यमेतत् त्वया पृष्टं	१७३	स्थितं तत् प्राकृते काये	७८
सदव्ययं तत्त्वमनर्घ्यं	२१४	स्वतद्विवेकविज्ञानात्	९८
सद्गुरोरुपदेशेन	१२९	स्वतःप्रकाशोऽयमयं	२१२
समत्वं सर्वभूतेषु	६२	स्वशरीरस्थमात्मानं	४७